# संस्कृत वार्ता:

दिनाङ्क : 05/09/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- गुणवत्तापूर्ण-शिक्षयैव विकसित-भारतस्य निर्माणं सम्भवेदिति राष्ट्रपतिः द्रौपदी-मुर्मुः प्राख्यापयत्, अत्रावसरे सा अष्टचत्वारिंशत् शिक्षकेभ्यः राष्ट्रिय-पुरस्कारानपि प्रदत्तवती ।
- छात्राणां जीवन-संस्काराय पाठ्यपुस्तकेभ्यः परं गन्तुं शिक्षकान् प्राचोदयत् प्रधानमन्त्री नरेन्द्रमोदी, सः बालकेषु पटल-दर्शन-व्यसनस्य न्यूनीकरणाय क्रीडा-बहिराङ्गण-प्रवृत्तीनां च संवर्धनाय आह्वानम् अकरोत्।
- प्रधानमन्त्री नरेन्द्र-मोदी अद्य सायं नवदिल्ल्यां श्री राम कॉलेज ऑफ़ कॉमर्स इत्यस्य शताब्दी-समारोहं सम्बोधयिष्यति ।
- भारतस्य प्रधानन्यायाधीशः सूर्यकान्तः नवदिल्ल्यां जायमाने ब्रिक्स-मुख्यन्यायाधीश-मञ्चे स्वस्थ-असहमतेः विमर्श-संस्कृतेश्च महत्त्वं प्रतिपादितवान् ।
- जलौघ-प्रभाविताय नेपाल-देशाय भारतेन पञ्चनवति-टन-परिमिता सहायता-सामग्री प्रेषिता ।
- महिलानां एशिया-चषक-विंशति-प्रतिविंशति-प्रतिस्पर्धायाः ए-वर्गस्य अन्तिम-रोमाञ्चक-द्वन्द्वे अद्य रात्रौ दुबई-नगरे चिर-प्रतिद्वन्द्विना पाकिस्तानेन सह योत्स्यते भारतम् ।

---

<u>राष्ट्रपति-शिक्षकपुरस्कारः</u>

राष्ट्रपतिपदासीना द्रौपदी-मुर्मुः अद्य उदघोषयत् यत् विकसित-भारतस्य स्वप्नः तदैव सत्यतामेष्यति यदा शिक्षा गुणवत्तापूर्णा सम्भविष्यति। शिक्षक-दिवसावसरे नवदिल्ल्याम् आयोजिते षड्विंशत्यधिक-द्विसहस्रतमस्य राष्ट्रिय-शिक्षक-पुरस्कार-समारोहे सम्बोधयन्ती सा प्रावोचत् यत् यः समाजः शिक्षकानाम् आदरं विदधाति, स एव वस्तुतः प्रगतिशीलः समाजः मन्यते। राष्ट्रपतिः प्रत्यपादयत् यत् अस्माकं संविधाने निहितस्य समानावसरस्य यथार्थ-प्राप्तौ शिक्षैव सर्वोत्कृष्टं साधनं वर्तते। प्राथमिक-विद्यालयेषु छात्राणां विद्यात्याग-मानाङ्कस्य दूरीकरणे शिक्षकाणां प्रयासाः एव हेतुभूताः सन्ति। सा न्यरूपयत् यत् शैक्षिक-उत्कृष्टता, कौशल-

संवर्धनम्, उद्यमिता च राष्ट्रस्य विकासे निर्णायकं योगदानम् आवहन्ति। भारतं ज्ञान-शक्तिम् विधाय जगति कौशल-राजधानीत्वेन प्रतिष्ठापयितुं देशस्य प्राथमिकता वर्तते। सा प्रतिपादितवती यत् ज्ञानं शक्त्याः महत्तरः स्रोतः अस्ति, यत् जनं स्वातन्त्र्येण चिन्तयितुं, सुविज्ञातान् निर्णयान् ग्रहीतुं, राष्ट्र-विकासे सार्थकम् अवदानं दातुं च सामर्थ्यं प्रयच्छति। राष्ट्रपतिवर्या अवदत् यत् कर्तव्य-निष्ठाः शिक्षकाः राष्ट्र-निर्माणस्य अग्रिम-पङ्क्तौ तिष्ठन्तः शिल्पिनः सन्ति।

राष्ट्रपतिना नारीणां अधिकार-संरक्षणाय सावित्रीबाई-फुले-महोदयायाः पावन-स्मृतिरपि सप्रश्रयं समुद्भाविता। अत्रावसरे राष्ट्रपति-महोदया राष्ट्रिय-शिक्षक-पुरस्कारान् समर्पयत्। सप्तविंशति-राज्येभ्यः, सप्तकेन्द्रशासित-प्रदेशेभ्यः, केन्द्र-सर्वकारस्य षड्भ्यः स्वायत्त-सङ्घटनेभ्यश्च चिताः अष्टचत्वारिंशत् विद्यालयीयाः अध्यापकाः एतान् पुरस्कारान् प्राप्तवन्तः। सहैव राष्ट्रपतिः उच्च-शिक्षण-संस्थानानां अथ च पॉलिटेक्निक्-संस्थानानां एकविंशति-प्राध्यापकेभ्यः राष्ट्रिय-सम्मानं प्रायच्छत्।

---

**प्रधानमन्त्री-शिक्षकदिवसः**

प्रधानमन्त्री नरेन्द्रमोदी अध्यापकान् समाहूतवान् यत् ते केवलं पाठ्यपुस्तकेषु आत्मानं न बद्ध्वा छात्राणां जीवन-संस्कारे बाल्य-भावस्य सुरक्षायै महत्तरं दायित्वं निर्वहेयुः। गतदिने नवदिल्ल्यां राष्ट्रिय-शिक्षक-पुरस्कार-विजेतृभिः सह संवादं कुर्वन् श्रीमोदी एतान् विचारान् न्यरूपयत्। सामाजिक-सञ्चार-पटले अस्य संवादस्य कतिपयान् दृश्यक्षणान् संयोज्य प्रेषिते एकस्मिन् सन्देशे प्रधानमन्त्रिणा विशेषतया बलं दत्तं यत् शिक्षकाः सुनिश्चिनुयुः यत् प्रत्येकस्मिन् छात्रे विद्यमानः बालकः सदा सजीवः तिष्ठेत् तदर्थं शिक्षकाः स्वान्तर्गतम् अपि बाल्य-भावं रक्षयेयुः। सः प्रत्यपादयत् यत् बालकेषु वास्तविक-परिवर्तनम् आनेतुं शिक्षकाः केवलं पाठ्यक्रमे सीमिताः न भूत्वा तेषां समग्र-जीवनेन सह एकीभवेयुः।

स्वास्थ्य-सामाजिक-प्रकरणेषु कथयन् श्रीमोदी बालकेषु प्रवर्धमानां पटल-दर्शन-व्यसनम् प्रति गभीरां चिन्ताम् प्रकटितवान्। अस्य पटल-व्यसनस्य उपशमनाय सः क्रीडा-प्रोत्साहनं, बहिः क्रीडा प्रवृत्तिः , सर्जनात्मक-कार्याणि च प्रभावशालिनः उपायाः सन्तीति व्यचारयत्।

राष्ट्रिय-शिक्षा-नीतेः प्रसङ्गमादाय श्रीमोदी अवदत् यत् बालकाः कक्षा-भित्तिभ्यः बहिः नीत्वा व्यावहारिक-कौशलैः कर्म-रूपैश्च सह संयोजनीयाः।

---------------------------------------------------

**प्रधानमन्त्री-राष्ट्रपतिसन्देशः**

प्रधानमन्त्री नरेन्द्र-मोदी अद्य शिक्षक-दिवसावसरे राष्ट्रपतिनः द्रौपदी-मुर्मुवर्यायाः एकं विशिष्टम् आलेखं सामाजिक-सञ्चार-पटले प्रासारयत् । स्वीये सन्देशे श्रीमोदी अलिखत् यत् अयम् आलेखः अध्यापन-कर्म मानवतायाः नव-निर्माणस्य, स्वतन्त्र-चिन्तनस्य, जिज्ञासा-भावस्य च प्रवर्धनार्थं पवित्रकार्यत्वेन सविस्तरं प्रस्तौति। सः न्यरूपयत् यत् राष्ट्रपतिः छात्रान् उत्तम-मानवरूपेण निर्मातुं शिक्षकाणां समाह्वानं कृतवती। येन छात्राः सास्कृतिक-न्यासम्, वैज्ञानिक-दृष्टिकोणम्, अन्त्योदय-आदर्शम्, पर्यावरण-संरक्षणं, राष्ट्रं सर्वोपरि इति भावनाञ्च हृदये धारयेयुः। आलेखे विशेषतया एतत् प्रतिपादितं यत् अध्यापकाः ज्ञानेन, कौशलेन, जीवन-मूल्यैः, आन्तरिक-प्रेरणया च जनानां जीवनं रक्षयन्ति ।

---------------------------------------------------

**प्रधानमन्त्री-सम्बोधनम्**

प्रधानमन्त्री नरेन्द्र-मोदी अद्य सायं नवदिल्ल्यां श्री राम कॉलेज ऑफ़ कॉमर्स इत्यस्य शताब्दी-समारोहे सोत्साहं भागं भजिष्यति । अत्रावसरे श्रीमोदी सभामपि सम्बोधयिष्यति ।

दिल्ली-विश्वविद्यालयस्य शीर्ष-घटक-रूपेण प्रतिष्ठितः श्री राम कॉलेज ऑफ़ कॉमर्स इत्येतत् भारतस्य उच्च-शिक्षा-संस्थानेषु अग्रगण्यः मन्यते। अयं महाविद्यालयः वाणिज्ये, अर्थशास्त्रे , प्रबन्धने च उच्च-स्तरीय-विद्याभ्यासस्य विशिष्टं केन्द्रम् अस्ति।

---------------------------------------------------

**विदेशमन्त्रालयः - नेपालदेशस्य**

विदेशमन्त्रालयः अवदत् यत्, नेपालदेशस्य जलाप्लावितात् त्रिशुली-आपण-क्षेत्रात् पञ्चवर्षीय-बालकेन सह इतोऽपि त्रयः भारतीयाः नागरिकाः रक्षिताः इति, येन रक्षितानां भारतीयानां सङ्ख्या एकोनसप्तत्यधिकैक-शतम् अभवत्। एम्. ई. ए. प्रवक्ता रणधीर जायसवालः ह्यः अवदत् यत् पञ्चसप्तत्यधिक द्विशतं यावत् भारतीयाः नागरिकाः लुप्ताः सन्ति। प्रवक्ता अवदत् यत्, गतमासस्य षड्विंशति दिनाङ्के नेपालदेशे विनाशकारि-आकस्मिकजलाप्लावनात् आरभ्य भारतेन नेपालदेशाय प्रायः पञ्चनवति-टन्मिता साहाय्यसामग्री प्रेषिता। विदेशमन्त्रालयस्य प्रवक्ता अवदत् यत्, नेपालस्य सर्वकारस्य आवश्यकतानुसारं भारतं नेपालाय निरन्तरं साहाय्यं प्रदास्यति। अत्रान्तरे, हिमालयीये राष्ट्रे जलाप्लावनेन मृतकानां सङ्ख्या चतुश्चत्वारिंशोत्तरत्रिशताधिकैक-सहस्रं यावत् वर्धिता।

---

<u>मुख्यन्यायाधीशः सूर्यकान्तः</u>

भारतस्य मुख्यन्यायाधीशः सूर्यकान्तः अद्य स्वस्थमतभिन्नतायाः विचार-विमर्शस्य च संस्कृतेः महत्त्वम् अधोरेखितवान्। नवदिल्ल्याम् आयोक्ष्यमाणस्य ब्रिक्स्-मुख्यन्यायाधीशानां मञ्चस्य अंशत्वेन भारतस्य मुख्यन्यायाधीशेन अद्य ब्रिक्स्-सदस्यराष्ट्राणां, सहभागीराष्ट्राणां च प्रतिनिधिमण्डलं सम्बोधितम्। समयोचितं पूर्वानुमेयं च न्यायदानम् आवश्यकम् इति सः अस्मिन् विषये बलं प्रदत्तवान्। सः स्मरणम् अकरोत् यत् कथं नालन्दा-विश्वविद्यालयः अत्यन्तं प्रख्यातं शैक्षणिककेन्द्रम् आसीत् यत्र समग्रविश्वस्य छात्राः संशोधकाः च विना कस्यापि भेदभावेन बाधया वा प्रवेशिताः आसन्। सः अग्रे अवदत् यत् ब्रिक्स्-देशः सजीव-नालन्दा-विश्वविद्यालयः इति नाम्ना अपि प्रसिद्धः भवेत्। अद्यतनं उपवेशनं ब्रज़िल्-देशस्य सर्वोच्चसङ्घीयन्यायालयस्य अध्यक्षः लूयिज़् एडसन् फचिनः, चीनदेशस्य मुख्यन्यायाधीशः झाङ्ग् जूनादयः अपि सम्बोधितवन्तः। मध्यस्थतायाः विषये एकस्मिन् सत्रे भाषमाणः, न्यायमूर्तिः सूर्यकान्तः अवधानं दत्तवान् यत् यथा यथा देशानां मध्ये व्यापारः वर्धते, व्यवसायानां कृते विवाद-निराकरण-तन्त्रस्य आवश्यकता भविष्यति । सः मध्यस्थ-संस्थानां मध्ये सहयोगस्य सुदृढीकरणाय, व्यावसायिक-प्रशिक्षणाय, बहुभाषीय-क्षमतायै, न्यायाधीशेषु, मध्यस्थेषु, अधिवक्तृषु, व्यवसायेषु च मध्ये संवादाय च आह्वानम् अकरोत्।

---------------------------------------------------

<u>महिला-क्रिकेट</u>

महिलानां एशिया-चषक-विंशति-प्रतिविंशति-प्रतिस्पर्धायाः ए-वर्गस्य अन्तिम-रोमाञ्चक-द्वन्द्वे अद्य रात्रौ दुबई-नगरे चिर-प्रतिद्वन्द्विना पाकिस्तानेन सह योत्स्यते भारतम् ।

।। इति वार्ता: ।।